संस्कृतशाला

पाठ्यक्रमस्य संरचना

संस्कृतशाला नामकः अयं त्रिंशद्दिनात्मकः व्यापकः पाठ्यक्रमः विद्यार्थिनां संस्कृतभाषायाः मूलतत्त्वानां स्पष्टबोधाय तथा सरलतया, स्वाभाविकतया च सम्भाषणेन भाषायां प्रावीण्य-प्राप्तये विनिर्मितः अस्ति। पाठ्यक्रमेऽस्मिन् लिखिताभ्यासात् अपेक्षया श्रवणम् (सुनना) तथा वदनम् (वाचनं, भाषणं इत्युक्ते बोलना) इत्येतयोः विशेषः आग्रहः क्रियते, येन विद्यार्थिनः बालकवत् स्वाभाविकरूपेण भाषाम् आत्मसात् इति कुर्वन्ति। दैनिकजीवनोपयोगी वाक्यानि, संवादाः, प्रश्नोत्तराणि श्लोकाः च अभ्यासरूपेण प्रदत्तानि सन्ति, येन संस्कृतभाषा न केवलं पठनीया, अपितु जीवनस्य अङ्गीभूता भाषा इति अनुभूयते।

उद्देश्य-सारणी

सामान्य-उद्देश्याः	विशिष्ट-उद्देश्याः
संस्कृतभाषां प्रति **रुच्युत्पादनम्**	सरलसंस्कृतवाक्यानां श्रवणेन-**अर्थग्रहणक्षमताया**: विकासः
संस्कृतभाषायां आत्मविश्वासेन **वदन-क्षमताया**: विकासः	दैनन्दिनजीवनसम्बद्धानां शब्दानां वाक्यानां प्रयोग-अभ्यासः
श्रवण-वदनकौशलयोः सन्तुलित-विकासः	लघु-संवादेषु सहभागिता
भाषा-भयस्य निवारणम्	प्रश्नोत्तर-रूपेण संवाद-निर्माण-प्रशिक्षणम्
संस्कृतभाषायाः व्यावहारिक-उपयोगः संस्कृतस्य स्वाभाविक-अधिगमः	**शुद्ध-उच्चारण**स्य अभ्यासः संस्कृतभाषायां **स्वपरिचय**-प्रस्तुतीकरण-क्षमतायाः विकासः

- **आहत्य दिनानि – ३०**
- **प्रतिदिनं समयः – १ होरा**
- **शिक्षणम् + अभ्यासश्च – २८ होराः**
- **परीक्षाः – ४ (प्रत्येका ३० निमेषाणाम्)**

प्रतिदिनम् १ होरायाः संरचना

कालांशः	*समयः*
पुनःस्मरणम्/ गीतम्	**१० निमेषाः**
नूतन-पाठांशः	**३० निमेषाः**
अभ्यासः / संभाषणम्/भाषाक्रीडा	**१५ निमेषाः**

३० दिवसीया दिवसानुसारयोजना

दिनानि १-५ : मूल-संभाषणं नित्योपयोगी-श्लोकाः च

(परिचय, सर्वनाम, लिंग-वचन, क्रियापद, संख्या, समय)

गीतम् - पठत संस्कृतम्

१ दिनम् :

- परिचयः, तद्-एतद् शब्दौ, अहं भवान् भवती, आम् न वा, अस्ति,नास्ति, अत्र, तत्र ,कुत्र ,सर्वत्र, अन्यत्र एकत्र, क्रियापदानि (लट्, प्र० पु०, उ० पु० एक०)
- श्लोकं - करदर्शनम् , - कथा - चतुरः काकः

२ दिनम् :

- षष्ठीविभक्तिः, आवश्यकम् मास्तु पर्याप्तम् धन्यवादः स्वागतम्, शिष्टाचारः(गीतम् - हेलो, हाय मास्तु) क्रियापदानि (लोट्, प्र० पु० एक०), संख्या, समयः, विद्यालयसम्बन्धिनः शब्दाः
- श्लोकं - भूमिवन्दनम्, - कथा - बुद्धिमान् शिष्यः

३ दिनम् :

- शब्देषु लिङ्गभेदज्ञापनम्, बहुवचनपाठनम्, सन्ति, कति, सप्तमीविभक्तिः, कदा, अद्य, श्वः... ह्यः... इदानीम्,
- श्लोकः - स्नानमन्त्रः, - कथा - सन्तोषस्य अन्वेषणम्

४ दिनम् :

- क्रियापदानि (बहुवचनम्), संख्या, समयः, स्वागतसम्भाषणम्, शिक्षक- छात्र संवादः
- श्लोकः - भोजनमन्त्रः, - कथा - गतानुगतिको लोकः

५ दिनम् : पुनरावृत्तिः, अभ्यासः

- गीतायाः द्वादशाध्यायस्य सस्वरवाचनम्

दिनानि ६-१० : विभक्तयः, अव्ययानि उपासना-श्लोकाः च

गीतम् - मनसा सततम्

६ दिनम् :

- क्रियापदानां बहुवचनरूपाणि, द्वितीयाविभक्तिः, पञ्चमीविभक्तिः
- श्लोकं - दीपनिर्वापणश्लोकः, कथा - मातुः देशभक्तिः

७ दिनम् :

- कथम्?, शीघ्रं x मन्दं, उच्चैः x शनैः, किमर्थम्, सप्तककाराः, अपि, अस्तु, अहं न जानामि, क्तवतु प्रत्यय, सम्बोधनम्, संख्या, समयः, सम्भाषणप्रदर्शनम्,
- श्लोकः - गणेशवन्दनम्, कथा - रामप्रसादः बिस्मिलः

८ दिनम् :

- च, अतः, एव, इति, अस्मि, यदि-तर्हि, यथा-तथा, तः-पर्यन्तम्, अद्य आरभ्य, कृते, क्तवतुप्रत्यय अभ्यासः
- श्लोकः - दीपमन्त्रः, कथा - अचलकर्तव्यप्रज्ञाम्

९ दिनम् :

- विशेषपाठनम् - आसीत् आसन् आसम्, एकः एका एकं,, संख्या, समयः, ॐ संख्याक्रीडा, भोजनसम्बन्धिशब्दाः
- श्लोकः - सरस्वतीध्यानम्, कथा - शिष्यभक्तिः

१० दिनम् :

- परीक्षा-१ (३० निमेषेषु)
- त्रुटिसुधारः + अभ्यासः (३० निमेषेषु)

दिनानि ११-१५ : विभक्तयः, अव्ययानि सुभाषितानि च

गीतम् - अवनितलं पुनरवतीर्णा स्यात्

११ दिनम् :

- वाहानानां नामानि, तृतीयाविभक्तिः, सह विना, अद्यतन आदि, भविष्यत्कालीनक्रियापदानां पाठनम्, गत आगामि,
- श्लोकः - कृष्णध्यानम्, कथा - अष्टावक्रः

१२ दिनम् :

- स्म, अभवत्, क्त्वाप्रयोगः, यदा-तदा, बन्धुवाचकशब्दाः, वेशभूषणानां नामानि, वर्णाः, रुचयः, क्रीडा - एकश्वासेन सङ्ख्याकथनम्
- श्लोकः - सूर्यध्यानम्, कथा - चाणक्यस्य निस्सपृहता

१३ दिनम् :

- नूतनं x पुरातनम्, बहु x किञ्चित्, दीर्घः x ह्रस्वः, उन्नतः x वामनः, स्थूलः x कृशः, एतादृश तादृश कीदृश, तुमुन्, किन्तु, निश्चयेन, बहुशः प्रायशः, किल/खलु?, शक्नोति,
- श्लोकः - न कश्चिदपि०, कथा - साधूनां जीवनम्

१४ दिनम् :

- विशेषणविशेष्यभावस्य अभ्यासः, इव, अपेक्षया, पशूनां नामानि, अवयवनां नामानि, वाक्यविस्तारणाभ्यासः, इतः पूर्वम् - इतः परम्, 'राम कृष्ण' संख्या क्रीडा,
- श्लोकः - आत्मार्थं जीवलोकेस्मिन्०, कथा - योगीश्वरस्य जलम्

१५ दिनम् :

- परीक्षा-२ (३० निमेषेषु)
- सम्भाषण अभ्यासः, वाक्यकथनम् (३० निमेषेषु)

दिनानि १६-२० : उत्कृष्ट-सम्भाषणम् सुभाषितानि च

गीतम् - राष्ट्रसेवनकार्यमेतद्

१६ दिनम् :

- क्त्वा - तुमुन् परिवर्तनाभ्यासः, बहिः x अन्तः, रिक्तं x पूर्णम्, इतोपि, इत्युक्ते, अन्ते, चेत्-नो चेत्,
- श्लोकः - छायामन्यस्य कुर्वन्ति०, कथा - धीरा हिरा

१७ दिनम् :

- आरोग्यसम्बन्धिशब्दाः, प्रश्नोत्तरस्पर्धा, ऋषीणां महापुरुषाणां च नामानि, कथा क्रीडा, दीर्घसंख्यापाठनम्, प्रश्नोत्तरम्, नामस्मरणक्रीडा,
- श्लोकः - प्रियवाक्यप्रदानेन०, कथा - कर्मयोगः

१८ दिनम् :

- वारम्, अतः यतः परिवर्तनाभ्यासः, यद्यपि-तथापि, यत्र-तत्र, कति-कियत् भेदज्ञापनम्, यावत्-तावत्, यत्-तत् यः-सः या-सा
- श्लोकः - अयं निजः परो वेति०, कथा - राजा रन्तिदेवः

१९ दिनम् :

- अस्माकम्, चर्चा, शतायुः-गतायुः क्रीडा, विनोदकणिकाकथनम्
- एकात्मतास्तोत्रम् (परिचयं सस्वरवाचनं च)
- श्लोकः - गीर्वाणभारती०, कथा - शिष्यभक्तिः

२० दिनम् :

- परीक्षा-३ (३० निमेषेषु)
- परीक्षायाः चर्चा (३० निमेषेषु)
- विभिन्न- बोली- हरियाणवी, बागडी, पंजाबी इत्यादयः मध्ये संस्कृतशब्दानां ज्ञानम्

दिनानि २१-२५ : सहजप्रवाहः, वाक्यरचना संस्कृतश्लोकाः च

गीतम् - देववाणीं वेदवाणीं

२१ दिनम् :

- चित्, ... द्वयम्, सङ्ख्यासु लिङ्गभेदः, शिक्षकः - अहं वैद्यः, मम नाम सुरेशः (छात्राणां प्रश्नाभ्यासः), अर्थम्,
- श्लोकः - पठामि संस्कृतं नित्यम्०, कथा - दरिद्रः कः?

२२ दिनम् :

- तव्यत्-अनीयर्, अनन्तकथा रचना, सङ्ख्यान्वेषणम् क्रीडा, छात्रैः सह प्रश्नोत्तरम्,
- श्लोकः - संस्कृतस्य प्रसाराय०

२३ दिनम् :

- पत्रलेखनम्, दूरवाणीसम्भाषणम्, मार्गनिर्देशः, तव्यत् अभ्यासः, सान्दर्भिकसम्भाषणम्, सङ्ख्यायोजनं क्रीडा, शुभाशयाः, कल्पनाकथनम्,
- श्लोकः - संस्कृतस्य कृते जीवन्०
- संस्कृतसङ्कल्पपाठः (परिचयं सस्वरवाचनं च)

२४ दिनम् :

- पुनरावृत्तिः
- श्लोकः - सरस्वतीवन्दना, संख्या - त्रीषु लिङ्गेषु

२५ दिनम् :

- परीक्षा-४
- छन्दानां परिचयः , श्लोकगानम्

दिनानि २५–३० : समापनम्

गीतम् - प्रत्येकस्मिन् दिने पञ्चानां गीतानां पुनरावृत्तिः

२६ दिनम् :

- प्रथमा-द्वितीया-तृतीयाविभक्तिः
- १० वाक्यकथनम्

२७ दिनम् :

- चतुर्थी-पञ्चमी-षष्ठीविभक्तिः
- २० वाक्यकथनम्

२८ दिनम् :

- सप्तमीविभक्तिः , विशेषण-विशेष्यभावः
- हिन्दी-पंजाबी-अंग्रेजी-गीतानाम् अनुवादः

२९ दिनम् :

- सम्पूर्णपाठ्यक्रमस्य पुनरावृत्तिः

३० दिनम् : सामूहिक-सम्भाषणम्, समारोपः

- यत् शिक्षितम्, तस्य प्रदर्शनम्
    - स्व-अनुभवकथनम्
    - धन्यवाद-ज्ञापनम्